Downloaded From : http://cbseportal.com/

This Question Paper consists of 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवं 4 मुद्रित पृष्ठाः सन्ति।

**Code No. 59/S/O**
गूढसंख्या

Roll No. ☐☐☐☐☐☐☐☐☐☐☐☐
अनुक्रमाङ्कः

**Set /** स्तवकः **A**

# BHARATIYA DARSHAN
# भारतीयदर्शनम्
# (247)

Day and Date of Examination ..........................................
(परीक्षादिवसः दिनाङ्कश्च)

Signature of Invigilators 1. ..........................................
(निरीक्षकयोः हस्ताक्षरम्)

2. ..........................................

---

***सामान्या निर्देशाः***

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

# BHARATIYA DARSHAN

## भारतीयदर्शनम्

## (247)

परीक्षासमयावधिः (Time) : होरात्रयम् (3 hrs) ] [ पूर्णाङ्काः (Full Marks) : 100

**निर्देशाः** — (i) अस्मिन् प्रश्नपत्रे [A] भागे 10, [B] भागे 10, [C] भागे 10, [D] भागे 5 इति आहत्य 35 प्रश्नाः सन्ति।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

(iii) **सर्वे** प्रश्नाः अनिवार्याः।

**[A]** दशानां युक्तं विकल्पं चिनुत— 1×10=10

1. दर्शनशब्दः कर्तृव्युत्पन्नश्चेत् को अर्थः स्यात्?

   (क) प्रमाणम् (ख) प्रमाता

   (ग) प्रमेयम् (घ) प्रमा

2. सर्वे प्राणिनः किं नेच्छन्ति?

   (क) इष्टम् (ख) अनिष्टम्

   (ग) उभयम् (घ) उभयभिन्नम्

3. कण्डकादिजन्यं दुःखमेव कः?

   (क) स्वर्गः (ख) नरकः

   (ग) मोक्षः (घ) भूतलः

4. अयं महापुरुष अहिंसा उपदिदेश, कः?

   (क) शङ्करः (ख) रामानुजः

   (ग) बुद्धः (घ) मध्वः

5. कस्य दर्शनस्य आचार्याः तीर्थङ्कराः भवन्ति?

   (क) जैनदर्शनस्य (ख) चार्वाकदर्शनस्य

   (ग) बौद्धदर्शनस्य (घ) शङ्करदर्शनस्य



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

6. बौद्धदर्शनोक्ते आर्यसत्यचतुष्टये इदं नान्तर्भवति

(क) दुःखम् (ख) दुःखसमुदयः

(ग) दुःखनिरोधः (घ) दुःखविरोधः

7. साङ्ख्योक्ताः प्रकृतिविकृतयः कति?

(क) 25 (ख) 7

(ग) 9 (घ) 4

8. क्लेशकर्मविपाकशैरपरामृष्टः पुरुषविशेषः कः?

(क) जीवः (ख) हिरण्यगर्भः

(ग) ईश्वरः (घ) प्राज्ञः

9. तात्पर्यनिर्णायकानि लिङ्गानि कति?

(क) सप्त (ख) अष्ट

(ग) पञ्च (घ) षट्

10. गुरूपदिष्टवेदान्तवाक्येषु कस्य श्रद्धा भवति?

(क) यस्य विश्वासः (ख) यस्य संशयः

(ग) यस्य व्युत्पत्तिः (घ) यस्य ज्ञानम्

**[B]** दशानां यथानिर्देशम् उत्तराणि लिखत— 2×10=20

11. वेदाङ्गानि कति? कानि च तानि? 1+1=2

12. उपवेदाः कति? के च ते? 1+1=2

13. हीनयानस्य नैरात्यवादे कति भेदः? भेदः कः? 1+1=2

14. चार्वाकमते पुरुषार्थाः कति? के च ते? 1+1=2

15. मीमांसादर्शने कति प्रमाणानि? कानि च तानि? 1+1=2

16. विशिष्टाद्वैते कति तत्त्वानि अङ्गीक्रियन्ते? तत्त्वानि च कानि? 1+1=2

17. द्वैताद्वैतसिद्धान्ते स्वतन्त्रं तत्त्वं किम्? अस्वतन्त्रं च किम्? 1+1=2



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From :http://cbseportal.com/

18. किन्नाम प्रायश्चित्तं कर्म? तस्य उदाहरणञ्च किम्? 1+1=2

19. वेदान्तशास्त्रस्य अधिकारी कः? वेदान्तशास्त्रस्य विषयः कः? 1+1=2

20. आत्मा वा अरे द्रष्टव्यः इति वाक्यं कुत्रास्ति? स विजिज्ञासितव्य इति वाक्यं कुत्रास्ति? 1+1=2

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त— 4×10=40

21. विद्यानां तात्पर्यं विचारयत। **अथवा** विद्यानां प्रयोजनम् आलोचयत।

22. जैनदर्शनस्य आरम्भकालवृत्तान्तम् आलोचयत। **अथवा** जैनदर्शनस्य मध्यमावन्तरकाले आलोचयत।

23. मीमांसागतं धर्मलक्षणं किम्? **अथवा** मीमांसागतां भावनां प्रतिपादयत।

24. अद्वैतिनां मते ब्रह्मस्वरूपं वर्णयत। **अथवा** अद्वैतिनां मायापदार्थं विचारयत।

25. शुद्धाद्वैतरीत्या मोक्षस्वरूपं पर्यालोचयत। **अथवा** विशिष्टाद्वैतमतनुसृत्य मोक्षोपायविचारं कुरुत।

26. शमस्य लघुटिप्पणीं लिखत। **अथवा** दमस्य लघुटिप्पणीं लिखत।

27. नित्यानित्यवस्तुविवेकं वर्णयत। **अथवा** इहामुत्रफलभोगविरागं वर्णयत।

28. निवृत्तस्य निवृत्तिः कथमिति विचारयत। **अथवा** प्राप्तस्य प्राप्तिः कथमिति समर्थयत।

29. अध्यारोपं वर्णयत। **अथवा** अपवादं वर्णयत।

30. प्रतिबिम्बवादं विचारयत। **अथवा** अवच्छेदवादं विचारयत।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः — 6×5=30

31. दर्शनानां साम्यवैषम्ये विचारयत। **अथवा** दर्शनशास्त्रस्य प्रकारान् प्रतिपादयत।

32. न्यायदर्शनोक्तं प्रत्यक्षप्रमाणं विचारयत। **अथवा** न्यायशास्त्रदिशा अनुमानोपमाने आलोचयत।

33. साङ्ख्यशास्त्रमवलम्ब्य प्रकृतेः स्वरूपवर्णनं कुरुत। **अथवा** साङ्ख्यप्रतिपादितं सृष्टिक्रमं वर्णयत।

34. वेदान्तोक्तं श्रवणं किमिति प्रतिपादयत। **अथवा** मनननिदिध्यासनयोः विस्तृतां टिप्पणीं कुरुत।

35. एकजीववादे मोक्षस्य व्यवस्थां विवृणुत। **अथवा** अनेकजीववादे मोक्षस्य व्यवस्थां प्रतिपादयत।

★ ★ ★



Downloaded From :http://cbseportal.com/ Courtesy : NIOS